# संस्कृत-वार्ता:

## 27.07.2024

## सायम् - 06:20

**मुख्यवार्ता:**

· प्रधानमन्त्री कथितवान् यत् सर्वेषां राज्यानां संयुक्तप्रयासेन सप्तचत्वारिंशदुत्तर-द्विसहस्रतमपरं विकसितभारत इति स्वप्नं पूरयितं शक्यते। श्रीमोदिना अद्य नवदिल्ल्यां नीत्यायोगस्य नवम-प्रशासकीयपरिषद: उपवेशनस्य अध्यक्षता विहिता।

· प्रधानमन्त्री नरेन्द्रमोदी श्व: पूर्वाह्ने एकादशवादने स्वीय "मन की बात" इति कार्यक्रमे देशवासिभिः साकं विचार-विनिमयं करिष्यति।

· विदेशमन्त्री डॉ एस्. जयशङ्कर: प्रत्यपादयत् यत् भारतं एक्टईस्ट इत्याख्याया: नीते: माध्यमेन आसियान इत्यस्य ऐक्यभावं केन्द्रीकरणं च यथावदेव स्थापयति।

· त्रयाणां स्पर्धानां श्रृंङ्खलाया: विंशति-प्रतिविंशति-अन्ताराष्ट्रिय-पुरुष-क्रिकेट-प्रतिस्पर्धायाम् अद्य सायं पल्लेकेले इत्यत्र भारतीयदलं श्रीलंङ्कादलं सम्मुखीकरिष्यति।

******

**प्रधानमन्त्री – 2047**

प्रधानमन्त्रिण नरेन्द्रमोदिना उक्तं यत् सप्तचत्वारिंशदुत्तर-द्विसहस्रतमपरं विकसितभारतं प्रत्येकं जनस्य द्विसस्रतम – महत्वाकाङ्क्षा वर्तते। अद्य नीत्यायोगस्य नवम-प्रशासकीयपरिषद: उपवेशनं सम्बोधयन् श्रीमोदी उक्तवान् यत् राज्यं लक्ष्यमिदं प्राप्तौ उत्कृष्टभूमिकां निभालयितुं शक्नोति। प्रधानमन्त्रिणा उक्तं यत् भारतंम् एतेषाम् अवसराणां लाभं गृह्णीयात् तथा अन्ताराष्ट्रिय – निवेशानुकूलं नीतीनां निर्माणं कुर्यात्। तेनोक्तं यत् भारताय विकसितराष्ट्र निर्माणदिशि अयं प्रगतिमार्ग: वर्तते। प्रधानमन्त्री कथितवान् यत् सर्वेषां राज्यानां संयुक्तप्रयासेन सप्तचत्वारिंशदुत्तर-द्विसहस्रतमपरं विकसितभारत इति स्वप्नं पूरयितं शक्यते। तेनोदीरितं यत् विकसितराज्यानि मिलित्वा विकसितभारतं निर्मास्यन्ति। श्रीमोदी उक्तवान् यत् भारतं यूनां राष्ट्रं वर्तते। स्व कार्यकालस्य कारणेन विश्वस्मिन् बृहदाकर्षणकारं वर्तते। तेन अग्रे कथितं यत – विकसितभारतं निर्मातुं कौशलानुसन्धान – नवाचार – वृत्याधारितेषु विषयेषु बलं प्रदातव्यम्। नीत्यायोगस्य प्रशासकीय – परिषद: उपवेशनमिदं राष्ट्रपति-भवनस्य सांस्कृतिक-केन्द्रे सञ्जातम्।

**भाजपा-उपवेशवम्**

भारतीयजनतापार्टीतिदलस्य शासितराज्यानां मुख्यमन्त्रीणां मन्त्रण अद्य सायं नवदिल्ल्यां समनुष्ठीयते। अस्य दलस्य मुख्यालये समयोक्ष्यमाणे एतस्मिन् उपवेशने दलस्य वरिष्ठनेतार: अपि सम्मिलिता: भविष्यन्ति। लोकसभानिर्वाचनस्य केन्द्रीयवित्तसङ्कल्पनासत्रस्य च प्रस्तुतानन्तरं एतस्मिन् उच्चस्तरीयोपवेशने प्राशासकीययोजनानां प्रभाविकार्यान्वयने अन्येषु च विषयेषु चर्चा सम्भाविता वर्तते।

## मन की बात

प्रधानमन्त्री नरेन्द्रमोदी श्व: पूर्वाह्ने एकादशवादने स्वीय "मन की बात" इति कार्यक्रमे देशवासिभिः साकं विचार-विनिमयं करिष्यति। "मन की बात" इति मासिक-कार्यक्रमस्य इदं द्वादशाधिकैकशतं संस्करणं भविता। अस्य कार्यक्रमस्य प्रसारणं आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनिभिः प्रसारयिष्यते। अयं कार्यक्रमः आकाशवाणी, दूरदर्शनम्, प्रधानमन्त्री-कार्यालयः, सूचनाप्रसारण-मन्त्रालयः इत्येतेषां यूट्यूब-वाहिनीष्वपि द्रष्टुं शक्यते इति। प्रधानमन्त्रिणः सम्बोधनानन्तरं अनुक्षणं अयं कार्यक्रमः क्षेत्रीय-भाषाष्वपि श्रोतुं शक्यते। क्षेत्रीय-भाषासु अस्य पुनः प्रसारणं रात्रौ अष्टवादने भविता।

## संस्कृत-साप्ताहिकी

प्रिया: श्रोतार:, संस्कृतजगता सम्बद्धै: विभिन्नै: क्रियाकलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ.एम.गोल्ड-प्रवाहिकात: रविवासरे मध्याह्ने सार्धैक-वादनत:भविष्यति। कृपया श्रृण्वन्तु।

## पुण्यतिथि: - अब्दुलकलाम:

राष्ट्रमद्य पूर्वराष्ट्रपते: प्रसिद्धवैज्ञानिकस्य च डॉ. ए. पी. जे. अब्दुलकलामवर्यस्य नवम्यां पुण्यतिथौ तस्मै श्रद्धाञ्जलि: समर्पयति। डॉकलामवर्य: भारतस्य अन्तरिक्ष-प्रक्षेपास्त्र-योजनासु महत्वपूर्ण-भूमिकां निभालितवान्। तस्मै मिसाइलमैन ऑफ इण्डिया इत्युपाधिरपि पदत्ता। केन्द्रीयगृहमन्त्री अमितशाह: सामाजिकसन्देशसञ्चारपटले अलिखत् यत् डॉकलामवर्यस्य जीवनं सुदृढपरिश्रमस्य साधारणस्य संवेदनशीलस्य च मिश्रणम् आसीत्। येन राष्ट्रस्य युवान: प्रेरिता: अभवन्।

## लोकसंवर्धनपर्व-दिल्लीहाट

अल्पसंख्यककार्यमन्त्रालयस्य नवदिल्ल्या: दिल्लीहाटइत्यत्र प्रचल्यमाने लोकसंवर्धनपर्व इत्याख्ये कार्यक्रमे मन्त्रालयस्य योजना: कार्यक्रमा: उपलब्धयश्च प्रदर्शिता: षोडश दिवसीय: अयमुत्सव: केन्द्रप्रशासनस्य शतदिवसीयकार्ययोजनाया: भागो विद्यते। य: मन्त्रालयस्य विविधकार्यक्रमाणाम् अन्तर्गतं सफलताया: कथाभि:सह सम्पूर्णराष्ट्रस्य उत्पादानां कलानां समृद्ध-सांस्कृतिन्यासानां संवर्धनमिति।

## सीआरपीएफ-स्थापनादिवस:

प्रधानमन्त्री अद्य केन्द्रीय-सशस्त्रारक्षि-बलस्य स्थापनादिवसावसरे तेभ्य: सैनिकेभ्य: शुभकामना: प्रदत्तवान्। सामाजिकसञ्चारपटले एकस्मिन् सन्देशे प्रधानमन्त्रिणा मोदिना उक्तं यत् केन्द्रीय-सशस्त्रारक्षिबलस्य राष्ट्रं प्रति समर्पणं प्रशंसनीयं वर्तते। गृहमन्त्रिणा अमितशाहेन अपि केन्द्रीय-सशस्त्रारक्षिबलस्य प्रयासानां प्रशंसा कृता सहैव तेषां सैनिकानां कुटुम्ब सदस्येभ्य: अपि शुभकामना: प्रदत्ता:।

## ऋतु-विभाग

भारतर्तु-विभागेन अनुमानितं यत् आगामि-द्वि-दिवसावधौ मध्यभारते प्रचण्डवृष्टि: भविष्यति। उत्तराखण्ड-गुजरात-पूर्वी राजस्थान-केरल-मध्यप्रदेश – छत्तीसगढ़ – विदर्भेषु अद्य अतिवृष्टि: भविष्यति इति आशास्यते। तत्रैव मध्य महाराष्ट्र – कोंकण – गोवा इत्येतेषु स्थलेषु वृष्टि: श्व: पर्यन्तं भवितुं शक्यते। उत्तरप्रदेश –

तमिलनाडु – पुडुचेरी – कर्नाटकेषु अद्य अतिवृष्ट्या: स्थिति: भवितुं शक्यते। उत्तराखण्डे प्रमुखनदीनां जलस्तरं प्रवर्धितम्। तत्रैव पर्वतीयक्षेत्रेषु विभिन्नेषु स्थलेषु भूस्खलनकारणेन अनेका: मार्गा: अवरुद्धा:।

**ओलम्पिक**

प्रधानमन्त्रिणा नरेन्द्रमोदिना भारतीय-क्रीडकेभ्य: शुभकामना: प्रदत्ता: आशा च प्रकटिता यत् ते स्वीयोत्कृष्टप्रदर्शनै: अस्मान् प्रेरयिष्यन्ति। प्रधानमन्त्रिणा प्रत्येकं क्रीडक: 'भारतस्य गौरव:' उद्घोषित: उक्तं च यत् सप्तदशाधिकैकशतं भारतीयक्रीडकै: आशा: बह्व्य: वर्तन्ते अद्य ते निश्चितरूपेण देशस्य स्वप्नं पूरयिष्यन्ति।

**कुपवाडा-संङ्घर्ष:**

केन्द्रशासितप्रदेशे जम्मूकश्मीरे कुपवाडाजनपदे नियन्त्रणरेखायां मच्छलसम्भागस्य क्षेत्रे एकस्मिन् अद्य अज्ञातेन जनेन सह भुशुण्डिकाप्रहार: जात:। रक्षासूत्रानुसारि एतस्मिन् संघर्षे एक: पाकिस्तानदेशीय: जन: दिवङ्गत:। तत्रैव सेनाया: सैनिकद्वयं व्रणितं जातम्।

**जयशङ्कर: - लाओसनगरं**

विदेशमन्त्री डॉ एस्. जयशङ्कर: अद्य लाओ-पी.डी.आर. इत्यत्र लाओसदेशस्य उप-प्रधानमन्त्रिणा विदेशमन्त्रिणा च सैल्युमैक्से-कोम्मासिथ इत्यमुना सार्धं मेलनं कृतवान्। सामाजिकसंचारपटले डॉ जयशङ्कर: व्यलिखत् यत् असौ मैकांगगङ्गासहयोगान्तर्गतं लाओसदेशाय दश परियोजनाभ्य: सहभागिता-ज्ञापन-पत्राणां आदानप्रदानं कृतवान्। अत्रावसरे विशिष्टमेकं प्रैष्यपत्रमपि प्रसारितम्। विदेशमन्त्री वियनतियाने इत्यत्र आसियान-उपवेशनावसरे तुर्किदेशीयेन विदेशमन्त्रिणा हाकान-फिदानेन सहापि चर्चां कृतवान्।

**क्रिकेट**

त्रयाणां स्पर्धानां श्रृंङ्खलाया: विंशति-प्रतिविंशति-अन्तराष्ट्रिय-पुरुष-क्रिकेट-प्रतिस्पर्धायाम् अद्य सायं पल्लेकेले इत्यत्र भारतदेशं श्रीलंङ्कादेशं सम्मुखीकरिष्यति। अनन्तरम् अगस्तमासस्य प्रथमदिवसात् कोलम्बोनगरे त्रिस्पर्धानाम् एकदिवसीयश्रृंङ्खला आरप्स्यते।

।। इति वार्ता: ।।